Sri:mathe: Ra:ma:nuja:ya namaha
A:zhva:r Emperumana:r Jeeyar Thiruva**d**igale: **S**aranam

**S**ri: Ve:da:cha:rya Virachitha

||क्षमा षोडसि - Kshama: Sho:**d**asi||

# An Account of forgiveness attribute of Lord of Sri:Rangam



Namperumal in Sri: Rangam along with Sri:Rangana:yaki during Pha:lguni uththaram unison
www.antaryami.net

1. श्रीरंगेश यया करोषि जगतां सृष्टिप्रतिष्ठाक्षयान्
अत्रामुत्र च भोगमक्षय सुखं मोक्षं च तत्तत्तृषाम् ।
त्वत्स्वातन्त्र् यमपोह्य कल्पित जगत्क्षेमाऽति हृद्या स्वतः
क्षान्तिस्ते करुणासखी विजयतां क्षेमाय सर्वात्मनाम् ॥

**S**ri:range:**s**a yaya: karo:shi jagagtha:m srushti prathishthakshaya:n
Athra:muthra cha bho:gamakshaya sukham mo:ksham cha thaththathrusha:m |
Thvathsva:thanthra yamapo:hya kalpitha jagathkshe:ma:thi hrudya: svathaha
Ksha:nthisthe: karuna:sakhi: vijayatha:m kshe:ma:ya sarva:thmana:m ||

2. पापानां प्रथमोऽस्म्यहं भवति चेच्छास्त्रं प्रमाणं परं
श्रीरङ्गेश! न विद्यतेऽत्र विशयस्सन्त्येव ते साक्षिणः ।
पृष्ट्वा तानधुना मयोदितमिदं सत्येन गृह्येत् चेत्
सत्यं ह्युक्तमिति क्षमस्व भगवन् सर्वं तदस्मत्कृतम् ॥

Pa:pa:na:m prathamo:smyaham bhavathi chechchha:sthram prama:**n**am param
**S**rirange:**s**a! Na vidhyathe:thra vi**s**ayassantye:va the: sa:kshi**n**aha |
Prushtava: tha:nadhuna: mayo:dithamidam sathye:na gruhye:th che:th
Sathyam hyukthamithi kshamasva bhagavan sarvam thadasmathkrutham ||

3. त्वत्क्षान्तिः खलु रङ्गराज! महती तस्याः पुनस्तोषणे
पर्याप्तं न समस्तचेतनकृतं पापं ततो मामकम् ।
लक्ष्यं नेति न मोक्तुमर्हसि यतः कुत्रापि तुल्यो मया
नान्यस्सिध्दयति पापकृत् तदधुना लब्धं तु नोपेक्ष्यताम् ॥

Thvathksha:nthihi khalu rangara:ja! Mahathi: thasya:h punastho:sha**n**e
Parya:ptham na samasthachethanakrutham pa:pam thatho: ma:makam |
Lakshyam ne:thi na mo:kthumarhasi yathaha kuthra:pi thulyo: maya:
Na:nyassidhyathi pa:pakruth thadadhuna: labdham thu no:pe:kshyatha:m ||

4. पुन्यं पापमिति द्वयं खलु तयोः पूर्वेण यत्साध्यते
तत्त्वद्विस्मृति कारकं तनुभृतां रङ्गेश! संजायते।
पाश्र्वात्यस्य तु यत्फलं तदिह ते दुःखच्छिदः स्मारकं
तेनानेन कृतं तदेव शिशुनेत्यस्मत्कृतं क्षम्यताम्॥

Pu**n**yam pa:pamithi dvayam khalu thayo:h pu:rve:**n**a yastha:dhyathe:
Thathvadvismruthi ka:rakam thanubhrutham range:**s**a! Samja:yathe:|
Pa:**s**rva:thyasya thu yathphalam thadiha the dukhachchhidaha sma:rakam
Thena:ne:na krutham thade:va **s**i**s**une:thyasmakrutham kshamyatha:m||

5. पुण्यं यत्तव पूजनं भवति चेत् तत्कर्तुरिष्टे कृते
तत्स्याद्रङ्गपते ! कृतप्रतिकृतं सर्वेऽपि तत्कुर्वते।
पापं चेदपराध ए व भवतस्तत्कर्तृसंरक्षणे
शान्तिस्ते निरुपाधिका निरुपमा लक्ष्येत तत् क्षम्यताम् ॥

Pu**n**yam yaththava pu:janam bhavathi che:th thathkarthurishte: kruthe:
Thasya:drangapathe:! Kruthaprathikrutham sarve:pi thathkurvathe: |
Pa:pam che:dapara:dha e va bhavathasthathkarthrusamraksha**n**e:
**S**a:nthisthe: niru:pa:dhika: niru:pama: lakshyetha thath kshamyatha:m||

6. न द्वित्राणि कृतान्यनेन निरयैर्नालं पुनः कल्पितैः
पापानामिति मत्कृते तदधिकान् कर्तुं प्रवृत्ते त्वयि ।
तेभ्योऽप्यभ्यधिकानि तान्यहमपि क्षुद्रः करोमि क्षणात्
तद्यत्नस्तव निष्फलः खलु भ वेत् तत्ते क्षमैव क्षमा ॥

Na dvithra:**n**i krutha:nyane:na nirayairna:lam punah kalpithaih
Pa:pa:na:mithi mathkruthe: thadadhika:n karthum pravruthe thvayi|
The:bhyo:+pyabhyadhika:mi tha:nyahamapi kshudrah karo:mi ksha**n**a:th
Tadhyathrasthava nishphalaha khalu bhave:th thaththe: kshamaiva kshama: ||

7. संभूयाखिलपातकैर्बहुविधं स्वं स्वं फलं दीयतां

सर्वं सह्यमिदं म म  त्वयि हरे ! जाग्रत्यपि त्रातरि ।

दुःखाक्रान्तमवेक्ष्य मामिह जनो दुष्टाशयस्त्वद् गुणान्

क्षान्त्यादीन् प्रति दुर्वचं यदि वदेत् सोढुं न  तच्छक्यते ॥



Sambhuya:khilapa:thakairbahuvidham svam svam phalam di:yatham
Sarvam sahyamidam ma ma thvayi hare! Jagrathyapi thra:thari |
Duhkhakra:nthamave:kshya ma:miha jano: dush**ta**:**s**ayasthvad gu**n**a:n
Ksha:nthya:di:n prathi durvacham yadi vade:th so:**d**hum na
thachchhakyathe: | |

8. क्षान्तिर्नाम वरो गुणस्तव महाञ्छीरङ्गपृत्वीपते।

सोऽयं सन्नपि सापराधनिवहाभावे न  विद्योतते।

तस्मान्नैकविधापराध करणे निष्ठावता नित्यशः

प्राप्नोत्येष मया प्रकाशमतुलं प्राप्स्याम्यहं च  प्रथाम् ॥

Ksha:nthirna:ma varo: gunasthava maha:chchhiranga pruthhvi:pathe:
So:yam sannapi sa:para:dhanivaha:bha:ve: na vidhyo:thathe |
Thasma:nnaikavidha:para:dha kara**n**e: nish**tt**a:vatha: nithya**s**a:
Pra:ptho:thye:sha maya: praka:**s**amathulam pra:psya:maham cha pratha:m | |

9. मत्पापक्षपणाय योजयसि चेद्घोरेण दण्डेन मां

रङ्गाधीश्वर! केवलाघ करणाद् दुःखं म म  स्यान्महत् ।

तद्द्रण्टुर्भवतोऽपि दुःखमतुलं घोरं दयालो ! भवेत्

तस्मात् तेऽपि सुखाय मत्कृतमिदं सर्व् त्वया क्षम्यताम् ॥

Mathpa:pakshapa**n**a:ya yojayasi che:ddho:re:**n**a da**n**de:na ma:m
Ranga:dhi**s**wara! Kevala:dha kara**n**a:d du:kham ma ma sya:nmahath |
Thaddra**n**turbhavatho:+pi duhkhamathulam gho:ram daya:**l**o:! Bhave:th
Thasma:th the:pi sukha:ya mathkruthamidam sarvam thvaya: kshamyatha:m | |

10. देव! त्वां शरणं प्रपन्नमपि मां दुःखान्यनन्याश्रयं

बाधन्ते यदि सर्वपापनिवहात् त्वां मोक्षयिष्याम्यहम् ।
इत्युक्त्तं त व वाक्यमर्थविधुरं जायेत यद्वा भ्वान्
तत्राशक्त इति प्रथेत हि ततो मां रक्षतु त्वत्क्षमा ॥

De:va! Thva:m **s**ara**n**am prapannamapi ma:m du:kha:nyananya:**s**rayam
Ba:dhanthe: yadi sarvapa:panivaha:th thva:m mo:kshayishya:myaham |
Ithyuktham tha va va:kyamarthhavidhuram ja:ye:tha yadva: bhva:n
Thathra:**s**aktha ithi prathhe:tha hi thatho: ma:m rakshathu thvathkshama: ||

11. न त्वं क्षाम्यसि चेदिदं म म कृतं नास्त्यत्र काचित्क्षतिः
पूर्व यत्समभूत् तदेव हि पुनर्जायेत् तज्जायताम्।
यद्वा स्यादधिकं च सोऽपि सुमहान् लाभोऽस्तु मे तादृशः
स्वामिन्! दासजनस्तवायमधिकं स्वैरेण दूरीभवेत् ॥

Na thvam ksha:myasi che:didam ma ma krutham na:sthyathra ka:chithkshathi:
Pu:rva yathsamabhu:th thade:va hi punarja:yath thajja:yatha:m |
Yadva: sya:dadhikam cha so:pi sumaha:n la:bho:sthu me: tha:dru**s**a:
Swa:min! da:sajanasthava:yamadhikam svaire:**n**a du:ribhave:th ||

12. सोऽहं क्षुद्रतया जुगुप्सिततमं दुष्कर्म नित्यं स्मरन्
कुर्वन् काममशुद्धरीतिरभवं श्रीरङ्गपृथ्वीपते !
एतत्ते महतो विशुद्धमनसा स्मर्तुं न युक्तं खलु
क्षान्त्या विस्मर तत्ततोऽहमसुखान्मुक्तो भवेयं सुखी ॥

So:ham kshudrathaya: jugupsithathamam dushkarma nithyam smaran
Kurvan ka:mama**s**uddhari:thirabhavam **S**rirangapruthhvi:pathe: |
Eththe: mahatho: vi**s**uddhamanasa: smarthum na yuktham khalu
Ksha:nthya: vismara thaththatho:+hamasukha:nmuktho: bhave:yam sukhi: ||

13. तत्तत्कर्म फलानुरूपमखिलो लोकस्त्वया सृज्यते

तस्मात्कर्म वशंवदत्वमधिकं वक्तुं तवापि क्षमम् ।
श्रीरङ्गेश्वर! तत्प्रशान्तिविधये क्षान्त्या निराकृत्य मे
सर्वं पातकमाशु दर्शय भवत्स्वातन्त्र्यमत्यङ्कुशम् ॥

Thaththathkarma phala:nuru:pamakhilo: lo:kastvaya: srujyathe:
Thasma:thkarma vasamvadathvamadhikam vakthum thava:pi kshamam|
Srirange:swara! Thathprasa:nthividhaye: ksha:nthya: nira:kruthya me
Sarvam pa:thakama:su darsaya bhavathsva:tanthryamathyankusam||

14. श्रीरङ्गेश! वचो मदीयमधुना व्यक्तं त्वया श्रूयतां
पुन्यं तत्फल सङ्गमात्र विरहाद् भूयो न मां प्राप्नुयात् ।
पापं नैव तथा फलं वितनुते शक्यं न तद्वारणं
तत्क्षान्त्या त व शक्यमेव तदियं सद्यस्त्वया कल्प्यताम् ॥

Srirange:sa! Vacho: madi:yamadhuna: vyaktham thvaya: Sru:yatham
Punyam thathphalam sangama:thra viraha:d bhu:yo: na ma:m pra:pnuya:th|
Pa:pam naiva thathha: phalam vithanuthe: sakhyam na thadva:ranam
Thathksha:nthya: thava sakyame:va thadiyam sadhyasthvaya: kalpyatha:m||

15. श्रीरङ्गेश्वर! पुण्यपापफलयोः स्वाधीनतां कुर्वतोः
सर्वेषां सुखदुःखयोः स्वयमहं मग्नाशयो मामपि ।
स्मर्तुं न प्रभवामि किं पुनरहो त्वामन्तरन्तः स्थितं
तत्ते त्वं क्षमया निरस्य कुरु मे त्वद्ध्यानयोग्यां दशाम् ॥

Sri:range:swara! Punyapa:paphalayo:h sva:dhi:natha:m kurvatho:h
Sarve:sha:m sukhaduhkhayo:h svayamaham magna:sayo: ma:mapi|
Smarthum na prabhava:mi kim punaraho: thva:mantharanthaha sthhitham
Thaththe: thvam kshamaya: nirasya kuru me: thvaddhaya:nayo:gya:m dasa:m||

16. अल्पं चेदनवेक्षणीयसरणावारोप्यतां मत्कृतं
किञ्चिद् भूरि भवेदिदं यदि गुरून् संप्रेक्ष्य मे त्यज्यताम् ।

यद्वाऽनन्तमनन्त वैभवजुषो रङ्गक्षमावल्लभ!

त्वत्क्षान्त्याः खलु लक्ष्यतामनुगुणामानीयतां तत्त्वया॥

Alpam che:danave:ksha**n**i:yasara**n**a:va:ro:pyatha:m mathkrutham
Kinchid bhu:rib have:didam yadi guru:n samprekshya me thyajyatha:m|
Yadva:+nanthamanantha vaibhavajusho: rangakshama:vallabha!
Thvathksha:nthya:h khalu lakshyatha:manugu**n**a:ma:ni:yatha:m thaththvaya: ||

17. संत्यक्त सर्वविहितक्रियमर्थकाम

श्रद्धालुमन्वहमनुष्ठितनिन्द्यकृत्यम् ।

अत्यन्तनास्तिकमनात्मगुणोपपन्नं

मां रङ्गराज्! परया कृपया क्षमस्व ॥

Samyaktha sarvavihithakriyamarthhaka:ma
**S**raddha:lumanvahamanush**tt**ithanindhyakruthyam|
Athyanthana:sthikamana:thmaguno:papannam
Ma:m rangara:j! paraya: krupaya: kshamasva||

------------फलश्रुति -Phala**s**ruthi----------

श्रीमान् कूरान्ववाये कलशजलनिधौ कौस्तुभाभोऽवतीर्णः

श्रीवेदव्यासभट्टारक तनयवरो रङ्गराजस्य ह्यृद्यः ।

वेदाचार्याग्रयनामा विदितगुणगणो रङ्गिगणः स्तोत्रमेतत्

चक्रे नित्याभिजप्यं सकलतनुभृतां सर्वपापापनुत्त्यै ॥

**S**rima:n ku:ranvava:yo: kala**s**ajalanidhau kausthubha:bho:+vathi:r**n**ah
**S**rive:davya:sabhatta:raka thanayavaro: rangara:jasya hyrudhyaha|
Ve:da:cha:rya:grayana:ma: vidithagu**n**aga**n**o: rangi**n**aha sthro:thrame:thath
Chakre: nithya:bhijapyam sakalathanubhrutha:m sarvapa:pa:panuththyai||